योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२७

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६

सर्गः २७

सर्गः २८

सर्गः २९

सर्गः ३०

सर्गः ३१

सर्गः ३२

सर्गः ३३

सर्गः ३४

सर्गः ३५

सर्गः ३६

सर्गः ३७

सर्गः ३८

सर्गः ३९

सर्गः ४०

सर्गः ४१

सर्गः ४२

सर्गः ४३

सर्गः ४४

सर्गः ४५

सर्गः ४६

सर्गः ४७

सर्गः ४८

सर्गः ४९

सर्गः ५०

सर्गः ५१

सर्गः ९०

सर्गः ९१

सर्गः ९२

सर्गः ९३

सर्गः ९४

सर्गः ९५

सर्गः ९६

सर्गः ९७

सर्गः ९८

सर्गः ९९

सर्गः १००

सर्गः १०१

सर्गः १०२

सर्गः १०३

सर्गः १०४

सर्गः १०५

सर्गः १०६

सर्गः १०७

सर्गः १०८

सर्गः १०९

सर्गः ११०

सर्गः १११

सर्गः ११२

सर्गः ११३

सर्गः ११४

सर्गः ११५

सर्गः ५२ सर्गः ११६

सर्गः ५३ सर्गः ११७

सर्गः ५४ सर्गः ११८

सर्गः ५५ सर्गः ११९

सर्गः ५६ सर्गः १२०

सर्गः ५७ सर्गः १२१

सर्गः ५८ सर्गः १२२

सर्गः ५९ सर्गः १२३

सर्गः ६० सर्गः १२४

सर्गः ६१ सर्गः १२५

सर्गः ६२ सर्गः १२६

सर्गः ६३ सर्गः १२७

सर्गः ६४ सर्गः १२८

सप्तविंशः सर्गः २७

भुशुण्ड उवाच ।

एतत्ते कथितं ब्रह्मन्यथास्मि यदिहास्मि च ।

त्वदाज्ञामात्रसिद्ध्यर्थं धाष्ट्र्येन ज्ञानपारग ।। १

श्रीवसिष्ठ उवाच ।

अहो नु चित्रं भगवन्भवता भूषणं श्रुतेः ।

आत्मोदन्तः प्रकथितः परं विस्मयकारणम् ।। २

धन्यास्ते ये महात्मानमत्यन्तचिरजीवनम् ।

भवन्तं परिपश्यन्ति द्वितीयमिव पद्मजम् ।। ३

यावदद्य दृशो धन्याः स्वात्मोदन्तमखण्डितम् ।

यथावत्पावनं बुद्धेः सर्वं कथितवानसि ।। ४

प्रभातं दिक्षु सर्वासु दृष्टा विबुधभूतयः ।

भवानिव जगत्यस्मिन्न महानवलोकितः ।। ५

कथंचित्प्राप्यते कश्चिद्भ्रान्त्वेव हि महाजनः ।

न भवानिव भव्यात्मा सुलभो जगति क्वचित् ।। ६

वंशखण्डे हि कस्मिंश्चिज्जायते मौक्तिकं यथा ।

जगत्खण्डे हि कस्मिंश्चिद्दृश्यते त्वादृशस्तथा ।। ७

मया तु सुमहत्कार्यमद्य संपादितं शुभम् ।

पुण्यदेहविमुक्तात्मा यद्भवानवलोकितः ।। ८

तदस्तु तव कल्याणं प्रविशात्मगुहां शुभाम् ।

मध्याह्नसमयो यन्मे व्रजामि सुरमन्दिरम् ।। ९

इत्याकर्ण्य भुशुण्डोऽसौ जग्राहोत्थाय पादपात् ।

संकल्पिताभ्यां हस्ताभ्यामुपात्तं हेमपल्लवम् ।। 6.1.27.१०

कल्पवृक्षलतापुष्पकेसरेण हिमत्विषा ।

तत्पात्रं मौक्तिकार्घ्येण पूरयामास पूर्णधीः ।। ११

तेनार्घ्यपाद्यपुष्पेण त्रिनेत्रमिव मामसौ ।

आपादमस्तकं भक्त्या पूजयामास पूर्वजः ।। १२

अनुव्रज्याकदर्थेन खगेन्द्रालमिति ब्रुवन् ।

विष्टरादहमुत्थाय ततः खगवदाप्लुतः ।। १३

व्योम्नि योजनमात्रं तु मदनुव्रज्यया गतः ।

करं करेणावष्टभ्य बलात्संरोधितः खगः ।। १४

मयि याते क्षणेनैव गगनाध्वन्यदृश्यताम् ।

निवृत्तोऽसौ विहंगेन्द्रो दुस्त्यजा संगतिः सताम् १५

अन्योन्यमपि कस्मिंश्चित्तरङ्गक इवाम्बुधौ ।

व्योमन्यदृश्यतां यातो खगस्मृत्या मुनीनहम् ।। १६

सप्तर्षिमण्डलं प्राप्य जायया परिपूजितः ।

याते कृतयुगस्यादौ पुरा वर्षशतद्वये ।। १७

संगतोऽहं भुशुण्डेन मेरोः शृङ्गद्रुमेऽभवम् ।

अद्य राम कृते क्षीणे त्रेता संप्रति वर्तते ।। १८

मध्ये त्रेतायुगस्यास्य जातस्त्वं रिपुमर्दन ।

पुनरद्याष्टमे वर्षे तत्रैवोपरि भूभृतः ।

मिलितोऽभूद्भुशुण्डो मे तथेवाजररूपवान् ।। १९

इति संकथितं चित्रं भुशुण्डोदन्तमुत्तमम् ।

श्रुत्वा विचार्य चैवान्तर्यद्युक्तं तत्समाचर ।। 6.1.27.२०

श्रीवाल्मीकिरुवाच ।

इति सुमतिभुशुण्डसत्कथां यो

विमलमतिः प्रविचारयिष्यतीह ।

भवभयबहुलाकुलास्थितां स

प्रसभमसत्सरितं तरिष्यतीति ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० भुशुं० समाप्तिर्नाम सप्तविंशः सर्गः ।। २७ ।।